सम्पादक: ड. रवीन्द्रनाथ माइति,
संस्कृत-विभागस्य, सहकारी अध्यापक:, नाढ़ाजोल राज-कलेज

# राज्ञो नलस्य चरितं नैषधीयचरितानुसारि वर्ण्यताम्।

संस्कृतसाहित्यललामभूतस्य विश्वविख्यातस्य नैषधीयचरिताभिधस्य महाकाव्यस्य प्रणेता कविकुलचूड़ामणि: कवितातार्किक सार्वभौम: लोकेत्तरप्रतिभासम्पन्न: सवहुमानं सुधानां महाकवि: श्रीहर्ष महाभागो विद्यते। अस्य महाकवे: पितु: नाम श्रीहीरविपश्चित: आसीत श्रीमति परमविदुषीमामल्लदेवी अस्य माताचासीत्। अस्य ग्रन्थस्य प्रथमसर्गस्य मूलप्रतिपाद्यविषयो भवति। नैयधीयचरितस्य: द्वाविंशति: सर्गा: सन्ति। अस्य प्रधान: रस शृङ्गारोऽस्ति।

तथ्यमिदं नैषधचरिते स्वयमेव महाकविना उक्तम्-

श्रीहर्ष: कविराजराजिमुकुटालङ्कारहीर: सुत:।
श्रीहीर: सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।। इति

कतिपया: पण्डिता कविममुं मैथिलं ब्राह्मणं स्वीकुर्वन्ति। अन्यषां मतेन कविरयं कान्यकुब्जब्राह्मण: चासीत्। अस्य विषये एकाऽऽख्यायिका लोके प्रचलिता विद्यते यत् सकाले एव अस्य पिता दिवङ्गत:। अस्य जननी एव अतिप्रेम्णा अस्य पालनपोषणमकरोत्। स्त्वमतीव चपलमति: वयसा पञ्चवर्षीय एव एकदा स्वपितु: शास्त्रर्थाहवे केनचित्पण्डितेन नवमानं श्रुत्वा कर्णपरम्परया विदीर्णहृदय: स्वजनकावन्तारं विजेतुमिच्छन्। वतीमाराधायितुं तत्परोऽभवत्। यथाविधि अनुतिष्ठतोऽत्यल्पवयसोऽपि अनेन श्रीघ्रमेव देवताप्रासादात् लोकोत्तरप्रतिभा प्राप्ता। ततश्चायं कान्यकुब्जेश्वरजयचन्द्रस्य राजपरिषदि स्वपितुरवन्तारं विजेतुं निश्चिकाय। लब्धावसरोऽयं चतुरस्त्रतया तं पराजितवान्। अत: कान्यकुब्जाधिपतिना सुभृशं

समादृतः। तस्य राजसभायां सर्वाधिकलब्धप्रतिष्ठो ज्जनगोष्ठीगारिष्ठो वरिष्ठश्च सञ्जातः। जयचन्द्रस्य शासनकालः ११६९ इसवीतः ११९५ दीयपर्यन्तमासीत्। अत एव हर्षस्य रचनाकालः द्वादशशताब्दाः उत्तरार्धः आसीत्। सरस्वतीप्रसादोपलब्धाऽसाधारणप्रतिभा-क्रान्तदर्शी कविरयं नैषधीयचरितार्णववर्णन-र्वीशकुलप्रशस्तिप्रभृतीन्काव्यग्रन्थान् श्वराभिसन्धिखण्डनखण्डद्यस्थैर्यविचारकरणानि चालौकिकान् संस्कृतवाण्यलङ्कारभूतान् प्रभुतान् तर्कनिबन्धान् प्रणीतवान् अति काव्येषु अस्य नैषधीयचरितं ग्रन्थान्तरेषु खण्डन-खण्डग्राद्यं अतिप्रशास्तिमवाप्नोत्।

पुण्यश्लोको नरपतिः नलो नैषधीयचरितमहाकाव्यस्य धीरोदात्तनायकोऽस्ति। आचार्यविश्वनाथः स्वीये साहित्यदर्पणे धीरोदात्तनायकस्य यान् यान् गुणान् वर्णयति ते सर्वे राज्ञि नले विद्यन्ते। यथा –

अविकत्थन क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः।।
(सा ० द० ३/३२)

दशरूपंककारेणाऽपि ये नायकगुणाः वर्णितास्तेऽप्यत्रास्तित्वं दधते। यथा —

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः।
रत्कलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा।।
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः।
शूरो दृढश्च ते जस्वी शास्त्रचक्षुश्च धार्मिकः।।
भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम्।

नैषधीयचरितस्य नायको नरपतिः नलः सौन्दर्ये मनसिज मतिशय्य लोके अपरानङ्ग इव विभाति। भूवोऽशेषाः रमण्यस्तस्मै स्पृहयन्ति। यथा –

नं का निशि स्वप्नगतं ददर्श तं, जगाद गोत्रस्खलिते च का न तम्।
तदात्मताध्यातधवा रते च का चकार व ान स्वमनोभवोद्भवम्।।

निर्जितकन्दर्पस्य नलस्याननस्य तुलनायामुपमाने दारिद्रयातिशयमनुभवति महाकविः श्रीहर्षः यथा –

सरोरुहं तस्य दृशैव निजितं, जिताः स्मितेनैव विधोरपि श्रियः।
कुतः परं भव्यमहो महीयसी तदाननस्योपमितौ दरिद्रता।।

महासत्त्वान्वितो नलः नैषधीयचरिते अतीव शूररूपेण चित्रितोऽस्ति विजययात्रासु तत्पृतनाभिः समुत्थापितं रजश्चन्द्रमसि कलङ्कत्वं दधातीति वर्णन मन्त्र प्रमाणम्। यथा —

यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम।
तदेव गत्वा पतितं सुधाऽम्बुधौ दधाति पङ्कीभवदङ्तां विधौ।।

स्मरजेता प्रतापानलसमन्वितो नरपतिः नलः यावान् वीर साहसप्रियश्च तावानेव धर्मरतश्च आसीत्। तस्य राज्ये पापप्रिय कलिरपि तपस्यां कुर्वन् कृशतां दधाविति महाकवेः श्रीहर्षस्य वर्णनं निदर्शनरुपेण संतिष्ठते। यथा –

पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे ?
भुव यदेकाङ्घ्रिकनिष्ठया स्पृशन्दधावधर्मोऽपि कुशस्तपस्विताम्।।

न्यायप्रियो निसर्गसुन्दरः नैषधः सर्वासां विद्यानां विज्ञात आसीदिति सर्वे सुधियोऽवगच्छन्त्येव। महकविः श्रीहर्षः तस्य क्तुदंशविद्या विज्ञातृत्वमधस्ताल्लिखति श्लोके प्रतिपादयति। यथा –

अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्त्रः प्रणयन्नुपाधिभिः।
नतुर्दशत्वं कुतवान्कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्।।

याचकव्राताना दारिद्रयनाशाय भूपतिः नलोऽद्वितीयो दाता सिद्धयात। अथिभ्यः समधिकं दत्त्वाऽपि नरपतिः नलस्तोषं न समवाय। अय मेव हेतुः यत् स स्वशिरःस्थितान् केशान् अयशरुपेणमन्यत्। यथा –

विभज्य मेरुर्न यदथिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः।
अमानि तत्तेन निजाऽयशोयुगं द्विफालबद्धाश्चिकुराः शिरः स्थितम्।।

भैमीविरहसन्तमो नरपतिः नलः निजोपवने सम्भ्रमन् समुत्कण्ठवशत् हिरण्मयं हंसं संगृहीतवान्। परं तस्य –

मदेकपुत्रा जननी जरातरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तोरेष जनस्तमदंयन्नहो विधे! त्वा करुणा रूणद्धि नो।।

— इति कारुणिकं विलापमाकर्ण्य झटिति तमुत्ससर्ज। एतेन विज्ञायते यत् स महान् दयार्द्रचितः आसीत्।

भूपति: नल: सङ्गीतकलामर्मज्ञ: आसीदित्यत्र नास्ति काचित् संशीति:। तत्त्वमिदं विज्ञाय प्रकृतिरपि भूपते: नलस्य स्वागतं नृत्यगीतवाद्यादिभि: विदधाति। यथा मकाकवि: श्रीहर्ष: नैषधीयचरितस्य प्रथमसर्गे निगदति।

विलासवापीतटवीचिवादनात्पिकाऽलिगीते: शिखिलास्यलाघवात्।
वनेऽपि तौर्यंत्रिकमारराध तं, इव भौगमाप्नोति न भाग्यभाग्जन:।।

दमयन्त्यां स्वयमनुरक्तोऽपि पुरन्दराग्निवरुणयमादिदिक्पालनां संदेशमादाय भैम्या अन्तिके नरपते: नलस्य गमनं तस्यौदार्य प्रथयति।

इत्थं नैषधीयचरितस्य सूक्ष्मपर्यालोचनेन वयं विद्म: यदस्य महाकाव्यस्य नायक: नरपति: नल: सुषमासमन्वित:, शूर:, विद्वान्, धर्मप्रिय:, न्यायप्रिय:, कर्तव्यपरायण:, प्रणयी, समुदारचेता च आसीत्। धीरोदात्तनायकस्य शास्त्रवर्णिता: सर्वे गुणा: राज्ञि नले विद्यन्त इत्यत्र नास्ति काचित् विप्रत्तिरिति शम्।